३२. अग्न्युत्सारायण प्राणप्रतिष्ठा
पत्र ३. स.

1336

9'x4.50"

प्रत्यङ्मुखः शनिः सोमः शेषा दक्षिणतो मुखाः ॥ भास्कराङ्गारकौ रक्तौ
श्वेतौ शुक्रनिशाकरौ । सोमपुत्रो गुरुश्चैव तावुभौ पीतकौ स्मृतौ ॥ कृष्णव
र्णं रविसुतं राहुकेतुं तथैव च ॥ अथ पञ्चलोकपालस्थापनविधिः ॥ आ
ग्नेय नैरृत्य ईशान वायव्ये ईशानादि क्रमशो भवति गणेशश्च ब्रह्मा विष्णुः
शिवश्च लक्ष्मीश्च पंचेति पंच मण्डलेषु ॥१॥ रक्तं गणपतिं कुर्यात् ब्रह्मा
णं श्वेतमेव च श्यामं विष्णुं शिवं श्वेतं पीतवर्णां तथा रमां ॥ ईश्वरो गिरजा
स्कंदः कृष्णः ब्रह्मेन्द्र मंत्रकृत । कालश्च चित्रगुप्तश्च इत्येते अधिदेवताः ॥
सूर्यादीनां ग्रहाणां तु वामदक्षिण भागयोः । क्रमेणैव प्रकर्तव्या अधिप्र
त्यधिदेवताः ॥ ब्रह्मशो श्वेत संकाशो गिरिजा रक्तसन्निभा । पीतमिन्द्रं तथा
स्कंदं कृष्णं विष्णुं यमं विदुः ॥ कालं च धूम्रवर्णं च चित्रगुप्तं तु लोहितं । नाना
वर्णाः समाख्याताः क्रमेणैवाधिदेवताः ॥ अग्निरापो धरा विष्णुरिन्द्रश्चेन्द्री
प्रजापतिः । सर्पो ब्रह्मा तथा चैते क्रमात्प्रत्यधिदेवताः ॥ हुताशनधरौ रक्तौ
पीताविन्द्रौ प्रकीर्तितौ । कृष्णो केशव सर्पौ च श्वेतौ वारि प्रजापती ॥ ब्रह्मा-

॥२॥ णं च पुनः श्वेतं कुर्यात्तस्याधिदेवताः ॥ वृत्रहाऽग्निर्यमः क्रव्या वरुणो
वायुर्धनाधिपः । ईशो ब्रह्माप्यनन्तश्च दिग्पालाश्च प्रकीर्तिताः ॥ पूर्वादिषु
दिशाश्वेतान् दिग्पालान् स्थापयेद्बुधः । पीतमिन्द्रं प्रकुर्वीत रक्तौ क्रव्याधनं
जयौ ॥ सितं कुबेर वरुणौ कृष्णमीशं यमं विदुः । श्वेतं पितामहं कुर्यादनन्तं कृ
ष्णरूपिणं ॥ इति दिग्पालदशकं नानावर्णं प्रकीर्तितं । अश्विन्यादि पू
र्वस्यां सप्त पुष्यादि दक्षिणे ॥ सप्त स्वात्यादिकं पश्चात् अभिजित्यादि चोत्तरे ॥
मेषादि त्रीणि पूर्वस्यां कर्कादि त्रीणि दक्षिणे । तुलादि पश्चिमे त्रीणि मकरादि त्री
णि चोत्तरे ॥ ईशाने चैव ऋग्वेदो ह्याग्नि कोणे यजुः तथा । नैर्ऋत्ये सामवेदस्तु
वायव्ये चाप्यथर्वणः ॥ सप्तर्षयस्तथा पूर्वे वसवोऽष्टौ तथैव च । याम्ये रुद्रा दशैका
श्च पश्चिमे चादितेः सुताः ॥ ईशाकोणे दश द्वौ च विश्वेदेवास्तथैव च । आग्नेय्यां मा
रा सप्त नैर्ऋत्यां पितरो नव । वायव्यां सागराः सप्त उत्तरे कुलपर्वताः ॥ वायव्येऽष्टौ
कुलानागा याम्ये षाड्गवस्तथा ॥ दुर्गा चैव तथाग्नेय्यां क्षेत्रपालास्तु पश्चिमे ॥ सप्तविंश
ति योगाश्च ईशाने स्थापयेद्बुधः । मण्डलमध्ये वह्निश्चैव स्थापनीया द्विजोत्तमैः ॥ मण्डल
त्रि॰ स्य वह्निः कुर्या नागेन्द्रं चोत्तरे सदा । कृष्णवर्णं फणं वासं सिंदूरेणैव रञ्जयेत् ॥ प्राच्यां ना
गमखं वृद्धिर्निगदितं भाद्रपदिके कार्तिके मार्गशीर्षे तये यमालयमुखं प्रत्यक् मुखं फाल्गुने चै
त्रे माधवके तथैव कथितं [illegible] गदित मासेषु चित्रमरो इति ॥२॥

बहुतों

स्मिन्

अग्निः सप्तिमिति इस सूक्त में अग्नि पद रहित पढ़ना: अग्नि पद सहि त पढे ॥४॥

जो एक प्रतिमा होय तो अस्यां प्रतिमायां कहना

एक मूर्त्ति का अग्न्युत्तारण करना होय तो और मूर्त्ती कहे तो और प्रतिमा होय तो आसु प्रतिमासु ऐसा कहेना र

॥१॥

प्रतिमायां ३

श्रीगणेशाय नमः ॥ अथ मूर्त्ति अग्न्युत्तारण आवाहन पद्धति प्रारंभः ॥
तत्रादौ संकल्पं कुर्यात् तद्यथा अद्येहेत्यादि अमुक गोत्रः अमुक शर्म्मा: अस्यां
ॐ अवघातादि दोष परिहारार्थं अग्न्युत्तारणं देवता सान्निध्यार्थं प्राण प्रति
ष्ठां च करिष्ये इति सङ्कल्पः ॥ अग्निः सप्तिमिति सूक्तमग्निपद रहितं संहि
तं च पठेत् ॥ अत्र वक्ष्यमाणं अग्निं सप्तिमिति सूक्तं पठन् मूर्त्तौ संतत जलधा
रां त्यजेत् ॥ तत्र मंत्रमाह अग्निः सप्तिं वाजंभरं ददात्यग्निर्वीरं श्रुत्यं कर्म्मनि
ष्ठां अग्नी रोदसी वि चरत्समञ्जन्नग्निर्नारीं वीरकुक्षिं पुरंधिं अग्ने रप्नशः
समिद्दस्तु भद्रा ऽग्निर्मही रोदसी आविवेश अग्निरेकं चोदयत्समत्स्वग्नि

यहां को दिसे वक्ष्यमाण कहेंगे कहना जो पढ़ना है त्यादि का पढेंगे दूसरे अग्निः सप्तिमिति इस मंत्र को पढे और प्रतिमा को किसी पात्र में स्थापित करि के ऊपर से संतति धारा जल की डे. मंद मंद संतत क जल की धारा न बंद होने पावै ॥५॥

और दो या बहुतों मूर्त्तिनि का अग्न्युत्तारण करना होय तो एक मूर्त्ति कि हना ॥ धातु निर्मित जिनके प्रसंग प्रत्येग भवन्ते हो उनको मूर्त्ति कहते हैं जो धातु निर्मित केवल गोलाकार हो उनको प्रतिमा कहते हैं धातु निर्मित मूर्त्ति और प्रतिमा में अग्न्युत्तारण होगा और पत्थर की मूर्त्तियों में अग्न्युत्तारण न ॥१॥ हीं होगा ॥

॥ अथाऽग्न्युत्तारणप्राणप्रतिष्ठाविधिः ॥

॥१॥ पूर्णपात्रंच दत्वा चैव सदक्षिणां॥ कर्म्मणः सांगतासिद्ध्यै दद्याद्विजानुसा
रिणीं। आचार्य्याय यथोक्तांवै ऋत्विग्भ्यश्चैव दक्षिणां॥ अभिषेकं ति
लकंचैव देयान्येभ्यश्च दक्षिणां। मंत्रपाठं ग्रहाणांच उद्वासनमतः परं॥
कुर्य्यादेतत्क्रमेणैव यथोक्तं होमकर्म्मणि। ब्राह्मणैः सहभुञ्जीत स्नान
श्चायमनुक्रमः॥ इति होमविधिरनुक्रमणिका॥ अथ होमविधिः॥
चतुरस्रं मण्डलंतत्र कुर्य्यादीशान्यकोणतः। सूर्य्यादीनां ग्रहाणांच स्थापयेत्
प्रथमं नव॥ मध्येतु भास्करं कुर्य्यात् वर्तुलं द्वादशाङ्गुलम्। आग्निकोणे इन्दु
विंबंच चन्द्रश्च चतुरङ्गुलं॥ दक्षिणे भूसुतं कुर्य्यात् त्रिकोणंच नवाङ्गुलं।
ईशकोणे धनुर्य्यद्वद्बुधं चैव नवाङ्गुलं॥ उत्तरे देवदेवेज्यं पद्माकारं षडङ्गु
लं। पूर्वकोष्ठे भृगुं तद्वत् चतुःकोणं नवाङ्गुलं॥ पश्चिमे सूर्य्यपुत्रञ्च नरा
कारं नवाङ्गुलं। नैऋत्ये सैंहिकेयंच मकराभं दिरङ्गुलं॥ वायव्येच तथा
केतुं खड्गाकारं द्विरङ्गुलं॥ शुक्रः कौप्राङ्मुखो ज्ञेयो गुरुसौम्यो उदङ्मुखो।

श्रीगणेशायनमः। प्रतिज्ञावरणं चैव स्वस्तिपुण्याहवाचनं आचार्यादेस्तुवरणं
रक्षाकङ्कणबंधनं ईशान्यां मण्डलं कृत्वा ब्रह्मणं स्थापनं ततः। स्थापनं लोकपाला
नां पश्चाना मनुपूर्वशः। तथाधि देवतानांच प्रत्याधि त्रिदिवौकसां॥ दिग्पाल
तारकादीनां योगणिशिक्षम रक्षिणां। वेदर्षिवसु रुद्राणां मादित्यानां तथैवच॥
विश्वेदेवा समा नृणां पितृसागर भूभृतां। नागगंध र्वाण्डकानां च स्थापनं मण्डले
स्मृतम्॥ वहिर्वा दिक्षु ततोशेषं यथानुक्रम मेवहि। अग्नेः प्रणयनं कृत्वा ततः
आवाहयेत्सुरान्॥ ब्रह्मोपवेशनादीनि चक्षुस्तथाहुतीः। कलशस्थापनं चैव
प्रतिष्ठापूजनं ततः॥ धूपदीपौ सनैवेद्यौ सर्वेषां विधिवत्ततः। होमंतु लोकपा
लानां धं ग्रहहोम मतः परं॥ अधिप्रत्यादि देवानां दिक्पालानां दिवौकसां। यो
गानांच ध्रुवागस्त्यो क्षेत्रपालस्यचैवहि॥ ब्रह्मा विष्णु शिवानांच विशेषेण
भक्तितः। अंते वै चंडिका होमं कुर्यात्प्राधान्य संज्ञकं होमांते स्विष्टकृतं चैव
घृतेनैव नवाहुतिः॥ दिग्पालेभ्यो बलिं दद्यात्पूर्णाहुतिमथाचरेत्। ब्रह्मणे

वृत्राणि दयते पुरूणि अग्निरह त्यं जरतः कर्णमावाऽग्निर्द्भ्यो निरदहज्जरू २१
थम् अग्निरत्रिं घर्म उरुष्यदं तरग्निर्नृमेधं प्रजया सृजत्सं अग्निर्दाद्द्रवि
णं वीरपेशा अग्निरृषिं यः सहस्रा सनोति अग्निर्दिवि हव्यमा ततानाग्
ग्ने धामानि विभृता पुरुत्रा अग्निमुक्थै ऋषयो विह्वयंते अग्निं नरो या
मनि बाधितासः अग्निं वयो अंतरिक्षे पतंतोऽग्निः सहस्रा परि याति गो
नां अग्निं विश ईळते मानुषी र्या अग्निर्मनुषो नहुषो विजाताः अग्नि
र्गांधर्वीं पथ्यामृतस्याग्नेर्गव्यूतिर्घृत आ निषत्ता अग्नये ब्रह्म ऋभव
स्ततक्षुरग्निं महामवोचामासुवृक्तिं अग्ने प्राव जरितारं यविष्ठाग्ने म

वा मूर्त्तौ २

जो मूर्त्ती प्रतिमा होय तो प्रतिमानां वा मूर्तीनां अन्येण ने स्थिता पठेत २

॥२॥ रि द्रविणमायजस्व ॥१॥ इत्यग्न्युत्तारणं समाप्तम् ॥ ततो देवे प्राणप्र
तिष्ठां कुर्यात् ॥ ततः प्रतिमायां अन्ये पात्रे ऽस्थित्वा असूनं गृहीत्वा प्रा
णप्रतिष्ठां कुर्यात् ॥ तत्र प्रथमं विनियोगः ॥ अस्य श्री प्राणप्रतिष्ठामं
त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामाथर्वाणि छन्दांसि-
क्रियामयवपुः प्राणाख्या देवता आं बीजं ह्रीं शक्तिः क्रौं कीलकं अस्यां प्र
यांह [redacted] प्राणप्रतिष्ठापने विनियोगः ॥ अथाऽसूनं गृहीत्वा प्राणप्रतिष्ठां
कुर्यात् ॥ तन्मंत्रः ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं ळं क्षं अः क्रों ह्रीं आं
हंसः सोहं अस्यां प्रति प्राणा इह प्राणाः ॥१॥ ॐ आं ह्रीं क्रों अं यं रं लं वं शं ॥२॥

वस्तुत्वे आसु प्रतिमासु। एषमूर्तिषुद्द एकवचने अस्मिन् मूर्त्तौ वा अस्यां प्रतिमायां

मायां २

यां १

षं सं हं ठं हं अः क्रों ह्रीं श्रौं हंसः सोहं अस्यां प्रतिमायां जीव इह स्थितः ।।२।। ॐ-
आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं ठं हं अः क्रों ह्रीं श्रौं हंसः सोहं अस्यां प्रतिमायां
सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुः श्रोत्रजिव्हा घ्राण पाणि पाद पायु प
स्थानी हागत्य सुखंचिरं तिष्ठंतु स्वाहा ।।३।। अमुकदेवायनमः इहाग
च्छ इह तिष्ठ वा अमुकीदेव्यैनमः इहागच्छ इह तिष्ठ ।। इति देवे वा प्रति-
मासु अग्न्युत्तारण पूर्वक प्राणप्रतिष्ठाविधिः समाप्तम् ।। लिखितं पौरुषा
देवीचरणेन सं. १९८६ फाल्गुन शुक्ल ५ बुधवासरे ।। श्रीरस्तु ।। राम ।।

इहसन्निधोभ
व मम पूजां ग
हाण

।।३।।

॥इतिअग्न्युत्तारणप्राणप्रतिष्ठा॥

समाप्तम्